**Series : S7PQR**

**SET ~ 4**

**प्रश्न-पत्र कोड**
**Q.P. Code** **22/7**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समयोः : **होरात्रयम्*** | *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* | *अधिकतम अंक : **80***
*Time allowed : **3** hours* | *Maximum Marks : **80***

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं।
Please check that this question paper contains **19** printed pages.

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं।
Please check that this question paper contains **18** questions.

(IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।**
**Please write down the Serial Number of the question in the answer-book at the given place before attempting it.**

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

[ ]

***General Instructions :***

*Question paper is divided into **4** sections.*

*It has total **18** questions.*

***Section A** – 1 Question no. 1*

***Section B** – 3 Questions no. 2 to 4*

***Section C** – 5 Questions no. 5 to 9*

***Section D** – 9 Questions no. 10 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशा:***

*अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति।*

*अस्मिन् प्रश्नपत्रे **अष्टादश (18)** प्रश्ना: सन्ति।*

***खण्ड: 'क'** – 1 – प्रश्नसंख्या 1*

***खण्ड: 'ख'** – 3 – प्रश्नसंख्या 2 – 4*

***खण्ड: 'ग'** – 5 – प्रश्नसंख्या 5 – 9*

***खण्ड: 'घ'** – 9 – प्रश्नसंख्या 10 – 18*

*विशिष्ट–निर्देशानुसारं प्रश्ना: समाधेया:।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया।*

## खण्ड: 'क'

## अपठितांश-अवबोधनम्

*10 अङ्का:*

## अपठितांश अवबोधन

## Unseen Reading Comprehension

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।
Read the following passage and answer the given questions in Sanskrit.

भक्तप्रवर: श्रीरविदास: परमवैराग्यवान्, भगवद्-भक्त:, तपस्यावान् महात्मा च आसीत्। प्रतिदिवसं स: पादत्राण-युगलद्वयम् निर्माति स्म। तस्मात् पादत्राण-युगलद्वयात् एकं युगलं विक्रीय स्वपरिवारस्य पोषणं करोति स्म। द्वितीयं च कस्मैचित् तीर्थयात्रिणे दरिद्राय वा यच्छति स्म। एकदा एक: श्रेष्ठी तम् उपसृत्य अवदत् – "भवत: कृपया मम गृहे पुत्र: अजायत; अत: भवते एता: स्वर्णमुद्रा: दातुम् इच्छामि।" श्रीरविदास: विनम्रतया अवदत् – "अहं तु जीविकार्जने सक्षम: अस्मि, भवान् स्वर्णमुद्रा: कस्मैचित् विकलांगाय दरिद्राय वा यच्छतु। उक्तं च – "वृथा वृष्टि: समुद्रेषु"। सक्षमाय जनाय दानं वृथा। श्रीरविदासस्य त्यागमयं जीवनं दृष्ट्वा श्रेष्ठी नतमस्तक: अभवत्। सुपात्रेषु एव दानं श्रेयस्करं भवति।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) *2×1=2*

(i) श्रीरविदास: प्रतिदिवसं किं निर्माति स्म ?

(ii) भवत: कृपया मम गृहे क: अजायत ?

(iii) श्रीरविदासस्य जीवनं कीदृशम् आसीत् ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) *2×2=4*

(i) श्रीरविदास: द्वितीयं पादत्राण-युगलं कस्मै यच्छति स्म ?

(ii) श्रीरविदास: विनम्रतया किम् अवदत् ?

(iii) भक्तप्रवर: श्रीरविदास: कीदृश: आसीत् ?

(इ) अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं समुचितं शीर्षकं लिखत।
इस अनुच्छेद का दो या तीन शब्दों में उचित शीर्षक लिखिए।
Write a suitable title for this passage in two or three words. *1×1=1*

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)
निर्देशानुसार उत्तर दीजिए : (केवल तीन प्रश्न)
Answer as directed : (Only three questions) *3×1=3*

(i) "अस्मि" इति क्रियापदस्य कर्तृपदं चिनुत ?
(A) श्रेष्ठी
(B) श्रीरविदास:
(C) अहम्
(D) स:

(ii) "समर्थाय" इति पदस्य पर्यायपदं चिनुत –
(A) सक्षमाय
(B) दरिद्राय
(C) उपसृत्य
(D) विकलांगाय

(iii) "अक्षम:" इति पदस्य विलोमपदं चिनुत –
(A) वृष्टि:
(B) नतमस्तक:
(C) भगवद्-भक्त:
(D) सक्षम:

(iv) "जीवनम्" इति पदस्य विशेषणपदं चिनुत –
(A) त्यागमयम्
(B) प्रतिदिवसम्
(C) दानम्
(D) दातुम्

## खण्ड: 'ख'

## रचनात्मक-कार्यम् *15 अङ्का:*

## रचनात्मक कार्य

## Writing Skills

**2.** भवान् आदित्य: । भवन्मित्रं अर्णव: संस्कृतगीत-गायन-प्रतियोगितायां प्रथमं पुरस्कारं लब्धवान् । तं वर्धापयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषापद-सहायतया पूरयित्वा पत्रं पुन: लिखत।

आप आदित्य हैं। आपके मित्र अर्णव ने संस्कृत गीत गायन प्रतियोगिता में प्रथम पुरस्कार प्राप्त किया। उसको बधाई देने के लिए लिखे गए पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूरा करके पुन: लिखिए।

You are Aditya. Your friend Arnav got first prize in the competition of singing Sanskrit song. In a letter written to congratulate him, fill in the blanks with the help of the words given in the box below and rewrite the same. $10\times\frac{1}{2}=5$

**पत्रम्**

दिनाङ्का:________

प्रियसखे ! (i) ________

सप्रेम (ii) ________

हर्षस्य विषयो यत् भवान् (iii) ___________ आयोजितायां राज्यस्तरीयायां संस्कृतगीत-गायन-प्रतियोगितायां प्रथमं (iv) __________ प्राप्तवान् । एतदर्थं तुभ्यं बहुश: (v) __________ यच्छामि । एवमेव भवान् संस्कृतस्य (vi) _________ करोतु । वार्षिक-परीक्षायाम् अपि सर्वोत्तमान् (vii) ____________ प्राप्नोतु । भवत: गृहमपि (viii) __________ उत्साहवर्धनं करिष्यामि।

भवत: मातृपितृचरणयो: मे (ix) __________।

भवदीयम् अभिन्नमित्रम्

(x) ___________ ।

**मञ्जूषा**

| |
|---|
| संस्कृत अकादमी-द्वारा, नमो नम:, अर्णव !, वर्धापनानि, पुरस्कारं, अङ्कान्, प्रचार-प्रसारं, आगत्य, आदित्य:, प्रणामा: । |

3. (क) प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया अथवा स्वतन्त्ररूपेण संस्कृतेन पञ्चवाक्यानि लिखत।

दिए गए चित्र को देखकर मञ्जूषा में दिए गए शब्दों की सहायता से अथवा स्वतन्त्र रूप से संस्कृत में पाँच वाक्य लिखिए।

Looking at the given picture, write five sentences in Sanskrit using the words given in the box or independently. *5×1=5*



**मञ्जूषा**

| |
|---|
| पुस्तकालयस्य, छात्राः, चित्रम्, पठन्ति, अत्र, पुस्तकानि, अध्यापकाः, लिखन्ति, उपविशन्ति, वातावरणम्, अस्ति, शान्तिपूर्णम्, विद्यालये, वर्धन्ते, ज्ञानम्। |

**अथवा (OR)**

(ख) मञ्जूषायां प्रदत्तशब्दानां सहायतया निम्नलिखितं विषयम् आधृय पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत :

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय के आधार पर पाँच संस्कृत वाक्यों का एक अनुच्छेद लिखिए :

With the help of the words given in the box, write a paragraph with five Sanskrit sentences on the following topic : *5×1=5*

विषय: – **दीपावलि:**

**मञ्जूषा**

| |
|---|
| पूजयन्ति, दीपानां, पंक्ति:, रात्रौ, लक्ष्मीम्, जना:, उल्लासमयम्, पर्व, मिष्टान्नम्, खादन्ति, कार्तिकमासस्य, वितरन्ति, अमावस्यायाम्, विस्फोटकान्, विस्फोटयन्ति। |

**4.** (क) मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितायां-लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत।

मञ्जूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुन: लिखिए।

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. $10\times\frac{1}{2}=5$

वसन्तर्तु: ऋतूनां (i) ____________ कथ्यते। अतएव अयम् (ii) ____________ ऋतुराजवसन्तनाम्ना (iii) ____________। प्रकृति: पुष्पै: पल्लवैश्च ऋतुराजवसन्तस्य (iv) ____________ अभिनन्दनं (v) ____________ च (vi) ____________। वसन्त: प्रकृतिकामिन्या: (vii) ____________ करोति। वस्तुत: वसन्त: प्रकृते: (viii) ____________ अस्ति। यत: अस्य ऋतो: (ix) ____________ प्रकृति: (x) ____________ जायते।

**मञ्जूषा**

| |
|---|
| ऋतु:, राजा, करोति, प्रसिद्ध:, हार्दिकम्, स्वागतम्, शृंगारम्, आगमनेन, प्रफुल्लिता, तारुण्यम्। |

**अथवा (OR)**

(ख) अधोलिखित-संवादे मञ्जूषातः संवादवाक्यं चित्वा रिक्तस्थानानि पूरयत :

निम्नलिखित संवाद में मंजूषा से संवाद वाक्य चुनकर रिक्त स्थान भरिए :

Fill in the blanks in the following conversation with the help of given sentences in box : *5×1=5*

*आचार्यः* — गोपाल ! किं त्वं जानासि यत् महाभारतं कुत्र अभवत् ?

*गोपालः* — (i) ____________________ ।

*आचार्यः* — कुरुक्षेत्रे कयोः मध्ये महाभारतं संजातम् ?

*गोपालः* — (ii) ____________________ ।

*आचार्यः* — कः युद्धं कर्तुं न वाञ्छति स्म ?

*गोपालः* — (iii) ____________________ ।

*आचार्यः* — गोपाल ! कः अर्जुनम् उपदिष्टवान् ?

*गोपालः* — (iv) ____________________ ।

*आचार्यः* — अधुना वद, यस्मिन् ग्रन्थे श्रीकृष्णः अर्जुनम् उपदिष्टवान् तस्य ग्रन्थस्य किं नाम ?

*गोपालः* — महोदय ! (v) ____________________ ।

**मञ्जूषा**

- महोदय ! भगवान् श्रीकृष्णः अर्जुनम् उपदिष्टवान् ।
- जानामि महोदय ! महाभारतं कुरुक्षेत्रे अभवत् ।
- कौरवपाण्डवयोः मध्ये महाभारतं सञ्जातम् ।
- तस्य ग्रन्थस्य नाम श्रीमद्-भगवद्-गीता अस्ति ।
- महोदय ! अर्जुनः युद्धं कर्तुं न वाञ्छति स्म ।

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम् *20 अङ्काः*

## अनुप्रयुक्त-व्याकरण

## Applied Grammar

**5.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखांकित पदों की सन्धि अथवा सन्धि-विच्छेद करके लिखिए। (केवल चार प्रश्न)
Disjoin or join sandhis in the underlined words of the following sentences. (Only four questions) *4×1=4*

(i) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।

(ii) तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।

(iii) शूरं कृतज्ञं दृढसौहृदञ्च।

(iv) दौवारिकः + तु तमाकृष्य नयन्नेव प्रचलितः।

(v) शठः सहस्रैरपि शिक्ष्यमाणः।

(vi) यक्ष्ये दास्यामि + इति अज्ञानविमोहिताः।

**6.** अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।
(केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखांकित पदों के उचित समस्तपद या उचित विग्रह को दिए गए विकल्पों से चुनकर लिखिए। (केवल चार प्रश्न)
Select the appropriate expound from the given choices for the underlined words 'समस्तपद' or 'विग्रह' of the following sentences.
(Only four questions) *4×1=4*

(i) एषा वेदोपनिषत्।

(A) वेदानाम् उपनिषत् (B) वेदेन उपनिषत्

(C) वेदेषु उपनिषत् (D) वेदं उपनिषत्

(ii) आ: अपण्डित: खलु भवान्।

(A) अन् पण्डित:   (B) नञ् पण्डित:

(C) न पण्डित:   (D) पण्डित: न

(iii) कुलगुरुं पितरौ च सभाजयितुं गमिष्याव:।

(A) मातौ च पितौ च   (B) मातरं च पितरं च

(C) मातृ च पितृ च   (D) माता पिता च

(iv) येन महान् चासौ उदधि: तस्मिन् विरचित:।

(A) महादधौ   (B) महोदधौ

(C) महोदधि:   (D) महादधि:

(v) स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।

(A) उचितम् अतिक्रम्य   (B) उचितम् अनतिक्रम्य

(C) यथा उचितम्   (D) उचितं यथा

**7.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयुक्तं विभक्तं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत। (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखांकित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति-प्रत्यय-योग को दिए गए विकल्पों में से चुनिए। (केवल चार प्रश्न)
From the given choices, choose the correct combination of joint or disjoint set of suffix for the underlined words in the following sentences.
(Only four questions) *4×1=4*

(i) कुशलान्न प्रमदितव्यम्।

(A) प्र + $\sqrt{\text{मद्}}$ + तुमुन्   (B) प्र + $\sqrt{\text{मद्}}$ + तव्यत्

(C) प्र + $\sqrt{\text{मद्}}$ + क्त   (D) प्र + $\sqrt{\text{मद्}}$ + शानच्

(ii) मया पुत्रवती च या।

(A) पुत्रवत् + वतुप् (B) पुत्रवत् + ङीप्

(C) पुत्रवत् + इन् (D) पुत्रवती + ङीप्

(iii) दौवारिक: तु तम् नी + शतृ एव प्राचलत्।

(A) निशतृ (B) नैन

(C) नीशत् (D) नयन्

(iv) कथं मोहम् उपगत: ?

(A) उप + गम् + क्त (B) उपगङ्ग + क्त

(C) उपगत + क्त (D) उपग + क्त

(v) वत्सराज: तं न $\sqrt{}$ हन् + क्तवतु।

(A) हतवत् (B) हतवतु

(C) हतवान् (D) हन्तवतु

(vi) दया भूतेषु अलोलुपत्वम्।

(A) अलोलुप + क्त (B) अलोलुप + त्व

(C) अलोलुप + तुमुन् (D) अलोलुप + मतुप्

**8.** प्रदत्तविकल्पेभ्य: उचितं उपपद-विभक्तिरूपं चिनुत। (केवलं प्रश्नचतुष्टयम्)
दिए गए विकल्पों से उपयुक्त उपपद विभक्ति रूप को चुनिए। (केवल चार प्रश्न)

Choose the appropriate subordinate clause from the given options. (Only four questions) *4×1=4*

(i) ________ प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी:।

(A) आचार्यात् (B) आचार्ये

(C) आचार्यस्य (D) आचार्याय

(ii) राजा राज्यं ________ दत्वा तदुत्सङ्गे भोजं मुमोच ।

(A) मुञ्जाय (B) मुञ्जस्य

(C) मुञ्जम् (D) मुञ्जे

(iii) कोऽन्योऽस्ति सदृशो ________ ।

(A) माम् (B) मम

(C) मया (D) मत्

(iv) कथं ________ उपगत: ।

(A) मोहात् (B) मोहम्

(C) मोहेन (D) मोहाय

(v) गुरुवर्यै: माम् अधिकृत्य ________ कथितम् ।

(A) पित्रे (B) पित्रा

(C) पितरम् (D) पितु:

**9.** अधोलिखितवाक्येषु वाच्यानुसारं कोष्ठकप्रदत्तशब्दै: रिक्तस्थानानि पूरयत । (केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में वाच्य के अनुसार कोष्ठक में दिए गए शब्दों से रिक्त स्थान भरिए।

(केवल चार प्रश्न)

Fill in the blanks in the following sentences with the help of the words given in brackets according to the voices. (Only four questions) *4×1=4*

(i) ________ पुस्तकं पठ्यते । (बालेन/बाल:)

(ii) मोहन: ग्रामं ________ । (गम्यते/गच्छति)

(iii) तेन प्रात: ________ क्रियते । (स्नानम्/स्नानेन)

(iv) श्यामेन सभायां ________ । (नृत्यते/नृत्यति)

(v) रामेण सह ________ वनं गम्यते । (सीता/सीतया)

## खण्डः 'घ'

## (i) पठितांशावबोधनम् — 25 अङ्काः

## पठितांश अवबोधन

## Reading Comprehension

**10.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।
Read the following prose passage and answer the questions based on them in Sanskrit. *5*

भोजविषयिणीम् इमां भविष्यवाणीं निशम्य मुञ्जो विच्छायवदनोऽभूत्। ततो राजा ब्राह्मणं संप्रेष्य निशीथे शयनमासाद्य व्यचिन्तयत् – यदि राजलक्ष्मीर्भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतः। ततश्च अभुक्त एव सः एकाकी किमपि चिन्तयित्वा बङ्गदेशाधीश्वरं वत्सराजं समाकारितवान्। वत्सराजश्च धारानगरीं सम्प्राप्य राजानं प्रणिपत्योपविष्टः। राजा च सौधं निर्जनं विधाय वत्सराजं प्राह – त्वया भोजो भुवनेश्वरी-विपिने रात्रौ हन्तव्यः, छिन्नं च तस्य शिरः मत्पार्श्वे अन्तःपुरम् आनेतव्यम्। एतन्निशम्य वत्सराजः उत्थाय नृपं नत्वा प्रावोचत् – यद्यपि देवादेशः प्रमाणम्, पुनरपि किञ्चिद् वक्तुकामोऽस्मि, सापराधमपि मे वचः क्षन्तव्यम्। देव ! पुत्रवधो न कदापि हिताय भवतीति।

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) भविष्यवाणीं निशम्य कः विच्छायवदनोऽभूत् ?

(ii) वत्सराजः कुत्र सम्प्राप्य उपविष्टः ?

(iii) पुत्रवधो न कदापि कस्मै भवति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) कां निशम्य मुञ्जो विच्छायवदनोऽभूत् ?

(ii) राजा ब्राह्मणं सम्प्रेष्य निशीथे किं व्यचिन्तयत् ?

(iii) वत्सराजः उत्थाय नृपं नत्वा किं प्रावोचत् ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) *2×1=2*

(i) 'मुञ्ज:' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?

(ii) 'प्रावोचत्' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'कल्याणाय' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**11.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following poetry and answer the questions based on them in Sanskrit. *5*

गुणी गुणं वेत्ति न वेत्ति निर्गुण:,
बली बलं वेत्ति न वेत्ति निर्बल:।
पिको वसन्तस्य गुणं न वायस:,
करी च सिंहस्य बलं न मूषक:॥

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) गुणी किं वेत्ति ?

(ii) निर्बल: किं न वेत्ति ?

(iii) वसन्तस्य गुणं क: न वेत्ति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) *2×1=2*

(i) क: गुणं न वेत्ति ?

(ii) पिक: कस्य गुणं वेत्ति ?

(iii) सिंहस्य बलं क: वेत्ति ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) *2×1=2*

(i) 'गज:' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम् ?

(ii) 'गुणी' इति कर्तृपदस्य कृते क्रियापदं किं प्रयुक्तम् ?

(iii) 'बली' इति पदस्य कृते विलोमपदं किं प्रयुक्तम् ?

**12.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following part of a drama and answer the questions based on them in Sanskrit. *5*

*संन्यासी* — कथमस्मान् संन्यासिनोऽपि कठोरभाषणै: तिरस्करोषि ?

*दौवारिक:* — भगवन् ! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयम् अदददेव आयाति इति आक्रुश्यते।

*संन्यासी* — सत्यं, क्षान्तोऽयमपराध:, परं संन्यासिनो, ब्रह्मचारिण:, पण्डिता:, स्त्रियो बालाश्च न किमपि प्रष्टव्या:।

*दौवारिक:* — संन्यासिन् ! संन्यासिन् ! बहूक्तम्, विरम न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे, केवलं महाराजशिववीरस्य आज्ञां वयं शिरसा वहाम:। प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ।

*संन्यासी* — तत् किं कोऽपि न प्रविशति रात्रौ।

*दौवारिक:* — (साक्षेपम्) कोऽपि कथं न प्रविशति ? परिचिता वा, प्राप्तपरिचयपत्रा वा, आहूता वा प्रविशन्ति, न तु ये केऽपि समागता भवादृशा:।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) संन्यासिन: अपि कै: तिरस्करोषि ?

(ii) तुरीयाश्रमसेवी क: भवति ?

(iii) वयं दौवारिका: कस्य आज्ञां न प्रतीक्षामहे ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) *2×1=2*

(i) दौवारिकेन कथम् आक्रुश्यते ?

(ii) परं के के प्रवेशसमये किमपि न प्रष्टव्या: ?

(iii) प्राह्णे कदा भवादृशानां प्रवेशसमयो भवति ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) *2×1=2*

(i) 'अपरिचिता:' इति पदस्य विलोमपदं किम् ?

(ii) 'वहाम:' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(iii) 'निशायाम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**13.** (क) अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दै: पूरयित्वा पुन: लिखत।

निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुन: लिखिए।

Rewrite the gist of the following verse by filling it with the help of the words given in the box. *3×1=3*

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्यय: ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥

**भावार्थ:**

राजा दिलीप: ज्ञाने सत्यपि (i) __________ धारयति, शक्तौ सत्यपि अपरान् जनान् (ii) __________ करोति, (iii) ___________ कृत्वा अपि स्वकीयां प्रशंसां न करोति। एवं राज्ञ: दिलीपस्य गुणा: गुणानुसारित्वात् सहोदरा इव सन्ति।

**मञ्जूषा**

| |
|---|
| त्यागम्, मौनम्, क्षमाम्। |

**अथवा (OR)**

(ख) प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत।

दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए।

Write the correct essence from three essences of the following each part. *3×1=3*

(अ) 'इदमस्तीदमपि मे भविष्यति पुनर्धनम्।'

(i) मम पार्श्वे एतन्मात्रं धनमस्ति अत्यधिकमपि अहं प्राप्स्यामि।

(ii) इदमस्ति इति चिन्तयित्वा कोऽपि सन्तुष्टः न।

(iii) इदं वस्तु मम वर्तते अन्यमपि मम एव स्यात्।

(आ) 'वर्षाणि किल वस्तव्यं चतुर्दश वने त्वया'।

(i) त्वया राजभवने चतुर्दश-वर्षाणि व्यतीतव्यानि।

(ii) त्वया चतुर्दश-वर्षाणि पर्यन्तं वनवासः विधेयः।

(iii) त्वया कथं वनं गन्तव्यम् ?

(इ) 'अनन्यशासनामुर्वीं शशासैकपुरीमिव'।

(i) सर्वशासकेन शासितं गगनं शासनं चकार।

(ii) अन्यशासकेन शासितां वसुधां शशास।

(iii) न अन्यशासकेन शासितां पृथ्वीम् एकपुरीमिव शासनं चकार।

**14.** अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्त-शब्दानां सहायतया पूरयत।

निम्नलिखित श्लोक के दिए गए अन्वय में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए शब्दों की सहायता से कीजिए।

The prose-order rendering of the following verse is given. Fill in the blanks with the help of words given in the box. *3×1=3*

अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥

**अन्वयः**

अनेकचित्तविभ्रान्ताः (i) __________ कामभोगेषु (ii) __________ अशुचौ (iii) __________ पतन्ति।

**मञ्जूषा**

| नरके, मोहजालसमावृताः, प्रसक्ताः। |
|---|

**15.** (क) 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तवाक्यै: सह मेलनं कुरुत।

'क' स्तम्भ के वाक्यों का 'ख' स्तम्भ के उपयुक्त वाक्यों के साथ मिलान कीजिए।

Match the sentences of column 'क' with suitable sentences of column 'ख'. *4×1=4*

| *'क' स्तम्भ:* | *'ख' स्तम्भ:* |
|---|---|
| i. क्रमप्राप्ते हृते राज्ये | 1. प्रज्ञया सदृशागम:। |
| ii. आकारसदृश: प्रज्ञ: | 2. क्वासौ दशास्यान्तक:। |
| iii. चिरं निमग्नोऽपि सुधा-समुद्रे | 3. भुवि शोच्यासने नृपे। |
| iv. सेतुर्येन महोदधौ विरचित: | 4. न मन्दरो मार्दवमभ्युपैति। |

**अथवा (OR)**

(ख) अधोलिखित-वाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषात: चित्वा लिखत।

निम्नलिखित वाक्यों में रेखांकित पदों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए।

Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box. *4×1=4*

(i) अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते।

(ii) यथा भार्या भर्तु: सहायिनी भवति।

(iii) दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।

(iv) अलूक्षा: धर्मकामा: स्यु:।

**मञ्जूषा**

| |
|---|
| कोमला:, पत्नी, स्वर्गम्, सरलत्वम्। |

## खण्ड: 'घ'

## (ii) संस्कृतसाहित्यस्य सामान्यपरिचय: *10 अङ्का:*

## संस्कृत साहित्य का सामान्य परिचय

## General Introduction to Sanskrit Literature

**16.** अधोलिखित-प्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर लिखिए। (केवल तीन प्रश्न)
Answer the following questions. (Only three questions) *3×1=3*

(i) 'मातुराज्ञा गरीयसी' पाठस्य लेखक: क: ?

(ii) 'प्रजानुरञ्जको नृप:' इति पाठ: कस्माद् ग्रन्थात् संगृहीत: ?

(iii) महर्षिणा वेदव्यासेन विचरितपाठस्य नाम किम् ?

(iv) 'मदालसा' इति पाठस्य लेखिका का ?

**17.** मञ्जूषायां प्रदत्तशब्दानां साहायतया रिक्तस्थानानि पूरयित्वा लिखत। (केवलं प्रश्नत्रयम्)
मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए। (केवल तीन प्रश्न)
Fill in the blanks with the help of the words given in the box.
(Only three questions) *3×1=3*

(i) उपमा ________ प्रसिद्धा।

(ii) गद्यं कवीनां ________ वदन्ति।

(iii) छन्दोरहिता रचना ________ कथ्यते।

(iv) भारवे: ________ प्रसिद्धम्।

**मञ्जूषा**

| |
|---|
| अर्थगौरवम्, गद्यम्, कालिदासस्य, निकषम्। |

**18.** समुचितं मेलयत :
समुचित मिलान कीजिए :
Match properly : *4×1=4*

| | | | |
|---|---|---|---|
| i. | अभिज्ञानशाकुन्तलम् | 1. | अङ्केषु भवति |
| ii. | भरतवाक्यम् | 2. | विदूषक: |
| iii. | नाटकस्य विभाजनम् | 3. | नाटकस्य अन्ते |
| iv. | हास्यरसोत्पादक: | 4. | कालिदास: |